पोषितुम्, पोषयितुम्, पुपोषिषितुम्-पुपुषिषितुम्, पोपुषितुम्;
पुष्टिः, पोषणा, पुपोषिषा-पुपुषिषा, पोपुषा;
पोषणम्, पोषणम्, पुपोषिषणम्-पुपुषिषणम्, पोपुषणम्;
पोषित्वा-पुषित्वा, पोषयित्वा, पुपोषिषित्वा-पुपुषिषित्वा, पोपुषित्वा;
प्रपुष्य, प्रपोष्य, प्रपुपोषिष्य-प्रपुपुषिष्य, प्रपोपुष्य;
[1]स्वपोषं-धनपोषं-गोपोषं-रैपोषं वा पोषति।

पोषम् २, पुषित्वा २— पोषित्वा २, } पोषम् २, पोषयित्वा २, } पुपोषिषम् २-पुपुषिषम् २, पुपोषिषित्वा २-पुपुषिषित्वा २, } पोपुषम् २; पोपुषित्वा २; }
[2]पोषयित्नुः, [3]पुष्करम्, [4]पुष्कलम्.

(1027) "पुष पुष्टौ" (IV-दिवादिः-1182. सक. अनि. पर.) [अ]

'धारणे पोषयेत् पुष्टौ पुष्येत् पुष्णाति पोषति।' (श्लो. 171) इति देवः।
पोषकः-षिका, पोषकः-षिका, पुपुक्षकः-क्षिका, पोपुषकः-षिका;
इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकतुष्यतिवत् (758) ज्ञेयानि।

---

1. 'स्वे पुषः' (3-4-40) इति णमुल्। 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इति णमुल्प्रयोजकस्यैव धातोरनुप्रयोगः। सूत्रे 'स्वे—' इति अर्थग्रहणम्, स्वरूपग्रहणं च। तेन रैपोषम्, गोपोषम् इत्यादिषु 'स्व' इत्यस्यार्थस्य सदृशार्थकेषु च णमुल् भवति।

2. ण्यन्तात्, 'स्तनिहृषिपुषि—' [द. उ. 1-140] इतीत्नुच्प्रत्ययः। 'अयामन्ताल्वाय्येत्न्विष्णुषु' (6-4-55) इति णेरयादेशः। पोषयित्नुः= पोषणकर्ता।

3. 'पुषः कित्' [द. उ. 8.71] इति करन्प्रत्यये, तस्य कित्त्वेन, बाहुलकात् प्रत्ययादेः ककारस्येत्संज्ञाभावे च रूपम्।

4. 'पुषः कलन् किच्च' [द. उ. 8-118] इति कलन्प्रत्यये रूपम्। अत्रापि बाहुलकात् प्रत्ययककारस्य न लोप इति ज्ञेयम्।

[अ] 'सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्।' इति (मेघसन्देशे II-13), 'पुपोष लावण्यमयान् विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि॥' इति (कुमारसम्भवे 1-25) च महाकविप्रयोगात् सकर्मकत्वम्। 'वराह इव पुष्यति—' इत्यादिप्रयोगदर्शनादकर्मकत्वमप्यस्य धातोः संगच्छत इति ज्ञेयम्।